**SET-4**

**Series JMS/C**

कोड नं.
**Code No. 52**

रोल नं.
Roll No. | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **19** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम्
# SANSKRIT

*अवधिः : होरात्रयम्* | *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

*Time allowed : 3 hours* | *Maximum Marks : 80*

| | | |
|---|---|---|
| खण्डः क : | अपठितांश-अवबोधनम् (अपठितांश-अवबोधन) | 10 अङ्काः |
| SECTION A : | Unseen Reading Comprehension | |
| खण्डः ख : | रचनात्मककार्यम् (रचनात्मक-कार्य) | 15 अङ्काः |
| SECTION B : | Writing Skills | |
| खण्डः ग : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 25 अङ्काः |
| SECTION C : | Applied Grammar | |
| खण्डः घ : | पठित-अवबोधनम् (पठित-अवबोधन) | 30 अङ्काः |
| SECTION D : | Reading Comprehension | |

***निर्देशाः :***
***Instructions :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में चार खण्ड हैं ।*
*The question paper has four sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।*
*Write the question number according to the question paper.*

*(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि **संस्कृतेन** लेखनीयानि ।*
*सभी प्रश्नों के उत्तर **संस्कृत** में लिखिए ।*
*Answer all the questions in **Sanskrit**.*

## खण्डः क (SECTION A)

### अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

### Unseen Reading Comprehension

10 अङ्काः

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् संस्कृतेन उत्तरत ।

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit.

जीवने ज्ञानप्राप्तेः अनेकानि साधनानि भवन्ति । विद्यालये वयं पुस्तकेभ्यः विविधं ज्ञानं प्राप्नुमः, परं व्यावहारिकं ज्ञानमपि जीवनाय परमोपयोगि वर्तते । व्यावहारिकज्ञानस्य प्राप्तौ तु लोकव्यवहारः एव सर्वाधिकं महत्त्वपूर्णं साधनमस्ति । लोकव्यवहारज्ञानं देशस्य विभिन्नप्रदेशानां पर्यटनेन सरलतया भवति । यदा वयं पर्यटनं कुर्मः तदा तत्र पर्यटनेन तत्रत्य – संस्कृति – वेषभूषा – वातावरण – भूगोल – इतिहास – उत्सव – प्रथादीनां विषयाणां ज्ञानं प्राप्नुमः । एतदेव कारणं यद् विद्यालयेषु छात्राणां कृते अवकाशकाले शैक्षणिकयात्रायाः आयोजनं क्रियते । एवं हि शैक्षणिकपर्यटनेन लोकव्यवहारस्य, सामाजिक संस्कृतेश्च बोधः जायते ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नचतुष्टयम्)

एक शब्द में उत्तर दीजिए । (केवल चार प्रश्न)

Answer in one word. (Only four questions) $\frac{1}{2} \times 4 = 2$

(i) ज्ञानप्राप्तेः कुत्र अनेकानि साधनानि भवन्ति ?

(ii) विद्यालये वयं केभ्यः विविधं ज्ञानं प्राप्नुमः ?

(iii) कीदृशं ज्ञानं जीवनाय परमोपयोगि वर्तते ?

(iv) विद्यालयेषु शैक्षणिकयात्रायाः आयोजनं कदा क्रियते ?

(v) व्यावहारिक ज्ञानस्य प्राप्तौ महत्त्वपूर्णं साधनं किमस्ति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *1×2=2*

(i) लोकव्यवहारज्ञानं सरलतया कथं भवति ?

(ii) वयं विभिन्नप्रदेशानां पर्यटनेन केषां ज्ञानं प्राप्नुम: ?

(iii) शैक्षणिकपर्यटनेन कयो: बोध: जायते ?

(स) यथानिर्देशम् उत्तरत । (केवलं प्रश्नचतुष्टयम्)
निर्देशानुसार उत्तर दीजिए । (केवल चार प्रश्न)
Answer according to instructions. (Only four questions) *1×4=4*

(क) 'प्राप्नुम:' इति क्रियापदस्य कर्तृपदं किम् ?
(i) विद्यालये
(ii) वयम्
(iii) ज्ञानम्

(ख) 'भ्रमणेन' इतिपदस्य पर्यायपदं किं प्रयुक्तम् ?
(i) शैक्षणिकयात्राया:
(ii) वातावरणम्
(iii) पर्यटनेन

(ग) वयं पुस्तकेभ्य: विविधं ज्ञानं प्राप्नुम: अत्र वाक्ये विशेषणपदं किं प्रयुक्तम् ?
(i) वयम्
(ii) विविधम्
(iii) ज्ञानम्

(घ) 'कठिनतया' इतिपदस्य विलोमपदं किं प्रयुक्तम् ?
(i) परमोपयोगि
(ii) अनेकानि
(iii) सरलतया

(ङ) वयम् सर्वनामपदं केभ्य: प्रयुक्तम् ?
(i) छात्रेभ्य:
(ii) ज्ञानस्य कृते
(iii) पुस्तकेभ्य:

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write the appropriate title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)

## रचनात्मककार्यम् (रचनात्मक-कार्य)

## Writing Skills

15 अङ्काः

**2.** भवतः नाम सुकेशः अस्ति । भवता जन्तुशाला दृष्टा । एतद्विषये स्वमित्रं दिनेशं प्रति लिखिते पत्रे मञ्जूषा-पदानां सहायतया रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखत ।

सुकेश द्वारा अपने मित्र दिनेश को 'जन्तुशाला' का वर्णन करते हुए लिखे गए पत्र में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए पदों की सहायता से कर पत्र को पुनः लिखिए ।

Complete the following letter (about zoo) written by Sukesh to his friend Dinesh, with the help of the words given in the box and rewrite the same.

$\frac{1}{2} \times 10 = 5$

(i) ____________

दिनाङ्कः____________

प्रिय मित्र दिनेश !

सप्रेम (ii) ____________

(iii) ____________ अहं मित्रैः सह जन्तुशालां द्रष्टुं कोलकातानगरम् अगच्छम् । तत्र (iv) ____________ मया नैके पशवः पक्षिणः च दृष्टाः । सर्वे जन्तवः भयरहिताः सन्तः (v) ____________ भ्रमन्ति स्म । सिंहाः उच्चैः गर्जन्ति स्म । मयूराः केकारवं कृत्वा (vi) ____________ स्म । वस्तुतः मयूरं विना जन्तुशाला न (vii) ____________ । तत्र आम्रवृक्षेषु कोकिलाः (viii) ____________ कूजन्ति स्म । दिनान्ते वयं (ix) ____________ जाताः । पुनः वयं ततः प्रस्थिताः । गृहे सर्वेभ्यः मम प्रणामाञ्जलयः निवेदनीयाः ।

तव ____________

(x) ____________ सुकेशः

**मञ्जूषा**

| |
|---|
| अभिन्नहृदयः, शोभते, कोलकातानगरात्, परिश्रान्ताः, तत्र, मधुरस्वरेण, इतस्ततः, नृत्यन्ति, विगतदिवसे, नमो नमः । |

**3.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन **पञ्च** वाक्यानि संस्कृतेन लिखत ।
नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में कीजिए ।
Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below. *2×5=10*



**मञ्जूषा**

| |
|---|
| बालकः, पादकन्दुकेन, पुस्तकम्, पठति, वृक्षाः, द्वौ बालकौ, चित्रफलके, क्रीडतः, बालिका, दोलायां, निर्माणं, चित्रम्, यन्त्रेण, पश्यति, वृक्षे, अधः । |

**अथवा (OR)**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।
मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।
Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box. *2×5=10*

**"भारतम्"**

**मञ्जूषा**

| |
|---|
| अस्माकम्, अयम्, देशः, भारतवर्षम्, हिमालयात् रामेश्वरपर्यन्तम्, नद्यः, गंगा, यमुना, गोदावरी, प्रभृतयः, अत्र, काशी, प्रयागः, मथुरा, तीर्थनगराणि, जाताः, अत्रैव, राम-कृष्ण-गौतमाः, ग्रामप्रधानः, कृषिप्रधानः । |

## खण्डः ग (SECTION C)

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

## Applied Grammar

25 अङ्काः

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए । (केवल चार प्रश्न)
Write the underlined words of the following sentences after joining or disjoining Sandhis. (Only four questions) *1×4=4*

(i) सीतां प्रति तु अयं लोकापवादः ।

(ii) अस्य श्लोकस्य अनु + अयः अतिमहत्त्वपूर्ण अस्ति ।

(iii) वृक्षच्छाया शीतला भवति ।

(iv) जगत् + ईश जगत् पालयति ।

(v) नद्याः + तटे नौका अस्ति ।

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)
Choose and write the correct compounded or expounded forms of the underlined words in the following sentences. (Only four questions) *1×4=4*

(क) जगतः पितरौ वन्दे ।

(i) माता च पितरः च

(ii) पिता च पिता च

(iii) माता च पिता च ।

(ख) अधुना सूर्यस्य उदयः भवति ।

(i) सूर्योदयः

(ii) सूर्य उदयः

(iii) सूर्यभुदयः ।

(ग) सरोवरे नीलकमलं शोभते ?

(i) नील: कमल:

(ii) नीलम् कमलम्

(iii) नीलश्च कमलश्च ।

(घ) नाटके दश आननानि यस्य स: रामं वदति ।

(i) दशाननम्

(ii) दशाननानि

(iii) दशानन: ।

(ङ) बालकेन प्रतिदिनम् गीता पठ्यते ।

(i) दिनम् दिनम् प्रति

(ii) दिनम् एव

(iii) दिनम् दिने ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पदों में प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below. (Only four questions) *1×4=4*

(क) छात्रै: राष्ट्रगीतं गै + तव्यत् ।

(i) गातव्य:

(ii) गातव्यम्

(iii) गायनम् ।

(ख) परिश्रमस्य महत्त्वम् को न जानाति !

(i) मह + त्वम्

(ii) महत् + वम्

(iii) महत् + त्व ।

(ग) कष्टानि सह् + शानच् वीरा: कीर्तिं लभन्ते ।
   (i) सहमान:
   (ii) सहमाना:
   (iii) सहमानम् ।

(घ) एषा मम पुत्र + ङीप् पठति ।
   (i) पुत्रम्
   (ii) पुत्रीम्
   (iii) पुत्री ।

(ङ) स: शक्तिमान् अस्ति ।
   (i) शक्ति + मतुप्
   (ii) शक्ति + मान्
   (iii) शक्ति + मात् ।

**7.** अधोलिखितं संवादं मञ्जूषायां दत्तै: पदै: वाच्यपरिवर्तनं कृत्वा पुन: लिखत ।
निम्नलिखित संवाद को मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए पुन: लिखिए ।
Re-write the following dialogue changing the voice with the help of words given in the box. *1×3=3*

राम: — त्वं कुत्र गच्छसि ?
श्याम: — मया तु आपणं (i) __________ ।
राम: — त्वं तत्र किमर्थं गच्छसि ?
श्याम: — मया तत्र (ii) __________ क्रेतुं गम्यते ।
राम: — त्वम् आपणात् कदा आगच्छसि ?
श्याम: — (iii) __________ आपणात् पञ्चवादने आगम्यते ।

**मञ्जूषा**

| फलानि, मया, गम्यते । |
|---|

**अथवा (OR)**

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत ।
निम्नलिखित वाक्यों में वाच्य-परिवर्तन कीजिए ।
Change the voice in the following sentences. *1×3=3*
(क) बाल: पुस्तकं पठति ।
(ख) त्वया गृहं गम्यते ।
(ग) लता चित्राणि पश्यति ।

**8.** अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत । (केवलं प्रश्नचतुष्टयम्)

निम्नलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए ।

(केवल चार प्रश्न)

Fill in the following daily routine using words in place of figures.

(Only four questions) $\frac{1}{2} \times 4 = 2$

(क) सुरेशः प्रतिदिनं प्रातः _________ वादने उत्तिष्ठति ।
5:00

(ख) सौरभः सायं _________ वादने क्रीडति ।
4:15

(ग) गीता _________ वादने गीतं गायति ।
7:30

(घ) रविः प्रातः _________ वादने विद्यालयं गच्छति ।
10:00

(ङ) सः सायं _________ वादने गृहम् आगच्छति ।
4:45

**9.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयत ।

(केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए ।

(केवल चार प्रश्न)

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box. (Only four questions) $1 \times 4 = 4$

(क) ईश्वरः _________ स्मरणीयः ।

(ख) जलं _________ जीवनम् असंभवम् अस्ति ।

(ग) अहं _________ विद्यालयं गच्छामि ।

(घ) असत्यं _________ वद ।

(ङ) त्वम् _________ शिष्टः छात्रः ।

**मञ्जूषा**

| इदानीम्, विना, मा, एव, सदा । |
|---|

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । अशुद्धं पदं संशोध्य पुनः लिखत ।
(केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है । अशुद्ध पदों को संशोधित कर पुनः लिखिए ।
(केवल चार प्रश्न)

Correct the underlined incorrect words and rewrite the following sentences. (Only four questions) *1×4=4*

(क) बालकः पाठं पठन्ति ।

(ख) श्वः सुरेशः विद्यालयं गच्छति ।

(ग) ग्रामं परितः वृक्षाः अस्ति ।

(घ) यूयम् सर्वाणि पुस्तकानि आदाय गच्छामः ।

(ङ) अशोकः मम मित्रः अस्ति ।

## खण्डः घ (SECTION D)

## पठित-अवबोधनम् (पठित-अवबोधन)

## Reading Comprehension

30 अङ्काः

**11.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following prose passage and answer the given questions in Sanskrit. *6*

गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् – आर्य ! किं सर्वगतं कुशलं वर्तते ? अयथाकालं समागतोऽसि । सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरूणम् उच्चैः अक्रन्दत् । बुद्धिमती सा अवदत् – अलं चिन्तया । आपदां तरणिः धैर्यम् । इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) *1×2=2*

(क) धर्ममतिः भार्यां प्रति किम् निवेदयति ?

(ख) कं त्यक्त्वा उद्यमः क्रियताम् ?

(ग) अयथाकालं कः आगतः ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) $2 \times 1 = 2$

(क) बुद्धिमती सा किम् अवदत् ?

(ख) दग्धमानस: धर्ममति: कथम् अक्रन्दत् ?

(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)

Choose and write the appropriate answer from the given options. (Only four questions) $\frac{1}{2} \times 4 = 2$

(क) 'अपृच्छत्' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?

(i) स:

(ii) भार्या

(iii) प्रच्छन्नभाग्य:

(ख) 'सम्प्रति' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(i) सपदि

(ii) इदानीम्

(iii) धैर्यम्

(ग) 'यथाकालम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(i) समागतम्

(ii) सम्प्रति

(iii) अयथाकालम्

(घ) 'बुद्धिमती' इत्यस्य विशेष्यपदं किम् गद्यांशे प्रयुक्तमस्ति ?

(i) भार्या

(ii) धर्ममतिः

(iii) तरणिः

(ङ) 'सः ... अक्रन्दत्' वाक्ये सः इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) धर्ममतये

(ii) दग्धमानसाय

(iii) भार्यायै

**12.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित पद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following poetry passage and answer the given questions in Sanskrit. *6*

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।

स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) *1×2=2*

(क) केन घटः पूर्यते ?

(ख) क्रमशः कः पूर्यते ?

(ग) केषां निपातेन घटः पूर्यते ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)

Answer in a complete sentence. (Only one question) $2\times1=2$

(क) केषाम् क्रमशः विकासः भवति ?

(ख) श्लोके कः प्रमुखः विषयः उक्तः अस्ति ?

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)
Choose and write the appropriate answer from the given options. (Only four questions) $\frac{1}{2}\times4=2$

(क) 'पूर्यते' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(i) पटः

(ii) घटः

(iii) धनम्

(ख) 'कारणम्' इत्यर्थे अत्र किं पदम् अस्ति ?

(i) हेतुः

(ii) जलबिन्दुः

(iii) धनम्

(ग) 'अधर्मः' इति पदस्य विलोमपदं किम् अस्ति ?

(i) घटः

(ii) जलबिन्दुः

(iii) धर्मः

(घ) 'स' इति सर्वाणामपदं कस्मै प्रयुक्तम् ?

(i) उद्यमाय

(ii) धनाय

(iii) धर्माय

(ङ) 'पतनेन' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

(i) हेतुः

(ii) निपातेन

(iii) क्रमशः

**13.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following drama passage and answer the given questions in Sanskrit. *6*

भीमः – (युधिष्ठिरं प्रति) भ्रातः ! द्रौणिम् अनुगन्तुं मध्यम् अनुमतिं ददातु भवान् ।

युधिष्ठिरः – गच्छ वत्स ! विजयी भव, नकुलः तव सारथिः भवतु । (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति ।)

श्रीकृष्णः – भो धर्मराज ! समीचीनं न कृतं भवता । पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति ।

युधिष्ठिरः – भगवन् ! सः तु एकाकी एव द्रोणपुत्राय अलम् ।

श्रीकृष्णः – वत्स ! न जानाति भवान् द्रौणेः चपलां प्रकृतिम् । पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे । यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) *1×2=2*

(क) कम् अनुगन्तुं भीमः युधिष्ठिरं प्रति अनुमतिं वाञ्छति ?

(ख) पितुः द्रोणात् प्राप्तं किं नाम अस्त्रं द्रौणेः पार्श्वे विद्यते ?

(ग) श्रीकृष्णः केन सह प्रविशति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)

Answer in a complete sentence. (Only one question) *2×1=2*

(क) यदि ब्रह्मशिरः अस्त्रं प्रयुज्यते तर्हि किं स्यात् ?

(ख) भीमसेनः एकाकी एव किमर्थम् अभिधावति ?

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)

Choose and write the appropriate answer from the given options. (Only four questions) $\frac{1}{2} \times 4=2$

(क) 'प्रकृतिम्' इति पदस्य विशेषणपदं किम् ?

(i) भवान्

(ii) चपलाम्

(iii) द्रौणेः

(ख) 'प्रविशति' इति क्रियापदस्य विलोमपदं किम् प्रयुक्तम् ?

(i) गच्छति

(ii) निर्गच्छति

(iii) जानाति

(ग) 'तस्य' इति पदं नाट्यांशे कस्मै प्रयुक्तम् ?

(i) भीमसेनाय

(ii) द्रौणिकृते

(iii) युधिष्ठिराय

(घ) 'पर्याप्तम्' इति पदस्य किं पर्यायपदं नाट्यांशे प्रयुक्तम् ?

(i) अलम्

(ii) व्यर्थः

(iii) हन्तुम्

(ङ) 'जानाति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(i) श्रीकृष्णः

(ii) भीमः

(iii) भवान्

**14.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्)

रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए । (केवल चार प्रश्न)

Frame the questions on the basis of the underlined words. (Only four questions) *1×4=4*

(i) संगणकयन्त्रम् आधुनिकविज्ञानस्य अद्भुतः आविष्कारः ।

(ii) श्रद्धावान् ज्ञानम् लभते ।

(iii) लोहितजनपदे अनेकबौद्धविहाराः सन्ति ।

(iv) साधूनाम् चित्ते वाचि च सरलता भवति ।

(v) षड् ऋतवः मे नाभयः ।

**15.** मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोक**द्वयस्य** अन्वयं पूरयत ।

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित ***दोनों*** श्लोकों के अन्वय को पूर्ण कीजिए ।

Complete the prose order of the following ***two*** shlokas by choosing the appropriate words given in the box. *$\frac{1}{2} \times 8 = 4$*

(क) यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णय: ।

कर्तुं शक्यो भवेद्येन स विवेक इतीरित: ।।

अन्वय: –

येन केन अपि यत् (i) _____________ तस्य (ii) _____________ येन कर्तुम् (iii) _____________ भवेत् स: (iv) _____________ इति ईरित: ।

(ख) नानाशस्त्रविद: पूर्वे येऽप्यतीता महारथा: ।

नैतदस्त्रं मनुष्येषु तै: प्रयुक्तं कथञ्चन ।।

अन्वय: –

ये (i) _____________ नानाशस्त्रविद: पूर्वे महारथा: (ii) _____________ तै: मनुष्येषु एतद् (iii) _____________ न (iv) _____________ प्रयुक्तम् ।

**मञ्जूषा**

| |
|---|
| अतीता:, विवेक:, प्रोक्तम्, तत्त्वार्थनिर्णय:, अस्त्रम्, शक्य:, कथञ्चन, अपि । |

**16.** अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)

निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)

Choose and write the correct gist of the following sentences from the given options. (Only four questions) *$1 \times 4 = 4$*

(क) काकस्य <u>गात्रं</u> यदि काञ्चनस्य ।

(i) ओष्ठौ

(ii) शरीरम्

(iii) मुखम्

(ख) यस्त्रिषष्टिशतारस्य अर्थं वेद परः कविः ।

(i) ज्ञातवान्

(ii) जानाति

(iii) वेदग्रन्थः

(ग) परमहम् अखण्डः शाश्वतः विभुः च ।

(i) तीव्रः

(ii) परोक्षः

(iii) सनातनः

(घ) वनौषधीनां तु अयं स्रोतः एव ।

(i) प्रवाहः

(ii) उद्‌गमः

(iii) श्रेष्ठः

(ङ) मम नृत्यं प्रकृतेः आराधना ।

(i) उपासना

(ii) भावना

(iii) अवमानना